धिभेदे २कर्कारौ ३दुर्गायाञ्च हेमच० । दुर्गायाश्च कूष्माण्ड बलिप्रियत्वात्तथात्वम् । "कुष्माण्डी तु स्वयं लघ्वी क-र्कारुः परिकीर्त्तिता" भावप्र० । चक्रविशेषे च

कूहा स्त्री ईषत् ऊह्यतेऽत्र ऊह-वितर्के आधारे घञर्थे क । कुज्झटिकायाम् शब्दरत्ना० ।

कृ कृतौ भ्वा० उभ० सक० अनिट् कविकल्प० । करति ते अकार्षीत् अकृत । चकार । भौवादिकस्याप्याप्राणिनीयता

कृ कृतौ तना० उभ० सक० अनिट् । करोति कुरुते कुर्य्यात् । करोतु कुरु अकरोत् अकार्षीत् अकृत । चकार कर्त्ता करिष्यतिते क्रियात् कृषीष्ट । कर्म्मणि क्रियते अकारिअकारिषातामकारयिषाताम् । कारकः कर्त्ता कारी कुर्वन् कुर्व्वाणः चक्रिवान् चक्राणः । डु—कृत्रिमः कृतः कृतवान् करणं कृतिः क्रिया कृत्वा कृत्वा प्रकृत्य । कृत्यं कार्य्यः कर्त्तव्यः करणीयः । णिचि कारयति ते अचीकरत्तसनि चिकीर्षति ते यङि चेक्रियते यङ् लुकि चरि(री)करीति चरि(री) कर्त्ति चर्करीति चर्कर्त्ति

"कृञो हेतुताच्छील्यानुलोम्येषु" पा०

"एषु द्योत्येषु करोतेष्टः स्यात् । अतः कूकमीति सः । यशस्करी विद्या । श्राद्धकरः वचनकरः" सि० कौ०

"दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दी-किम्लिपिलिबिबलिभक्तिकर्त्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वह-र्यत्तद्धनुररुष्षु" पा० ।

"एषु कृञष्टः स्यात् । अहेत्वादावपि । दिवाकरः विभाकरः निशाकरः कस्कादित्वात्सः । भास्करः बहुकरः बहुशब्दस्य वैपुल्यार्थे संख्यापेक्षया पृथग्-ग्रहणम् लिपिलिबिशब्दौ पर्य्यायौ । संख्या-एककरः । द्विकरः । कस्कादित्वात्सः । अहस्करः । नित्यम् समा-सेऽनुत्तरपदस्थस्येति षत्वम् । धनुष्करः । अरुष्करः । "किंयत्तद्बहुषु कृञोऽज्विधानमिति" वार्त्तिकम् किङ्करा । तत्करा । हेत्वादौ टम्बाधित्वा परत्वादच् । पुंयोगे ङीप् । किङ्करी । "कर्म्मणि भृतौ" पा०

"कर्म्मशब्दे उपपदे करोतेष्टः स्यात् भृतौ । कर्म्म-करो भृतकः । कर्म्मकारोऽन्यः" सि० कौ०

"न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु" पा० ।

"एषु कृञष्टो न । हेत्वादिषु प्राप्तः प्रतिषिध्यते । शब्दकार इत्यादि" । "स्तम्बशकृतोरिन्" पा०

"व्रीहिवत्सयोरिति वक्तव्यम्" वार्त्ति० । स्तम्बकरि-र्व्रीहिः । शकृत्करिर्व्वत्सः । व्रीहिवत्सयोः किम् स्तम्बकारः । शकृत्कारः" । सि० कौ०

"सुकर्म्मपापमन्त्रपुण्येषु कृञः" पा० "सौ कर्म्मादिषु च कृञः क्विप् स्यात् । त्रिविधोऽत्र नियम इति काशिका । सुकृत् कर्म्मकृत् पापकृत् मन्त्रकृत् पुण्यकृत् । क्विबेवेति नियमात्कर्म्म कृतवानिति निष्ठा न । कृञ एवेति नियमान्मन्त्रमधीत-वान्मन्त्राध्यायः अत्र न क्विप् । भूत एवेति नियमात् मन्त्रङ्करोति करिष्यति वेति विवक्षायाम्न क्विप् । स्वा-दिष्वेवेति नियमाभावादन्यस्मिन्नप्युपपदे क्विप् । शास्त्र-कृत् । भाष्यकृत्" । सि० कौ०

अधि+अधिकारे आरम्भे सक० अधिकरोति अधिकृत्य

अनु+सदृशीकरणे अनुकरोति । "शैलाधिपस्यानुचकार लक्ष्मीम्"

अप+अपकारे अनिष्टाचरणे अपकरोति "रिपौ सान्त्वमपक्रि-या" माघः [प्राधान्येनापाक्रियते" छा०उ० भा०

अप+आ निवारणे सक० । अपाकरोति । "अयं प्रश्नः

आ+आकारे अवयवसंस्थाने आकृतिः आकारः

उद्+आ+उत्कालने सक० "उदाकरोति उत्कालयति "याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाचैताः सौम्योदज सोमश्रवाः ! इति ताहोदाचकार" छ०उ० । "ताः ह उदाचकार उत्कालितवानाचार्य्यगृहम्" भा० ।

उप+उपकारे सक० उपकरोति "उपकृतं बहु तत्र किमुच्यते" सा० द० । संस्कारे सक० सुट् च । उपस्करोति

उप+आ+आरम्भे उपाकरोति उपाकृत्य "श्रावण्यां प्रौष्ठ पद्यां वा उपाकृत्य यथाविधि" मनुः पश्वादिसंस्कारे च उपाकर्म्मशब्दे उदा० ।

दुर्—दुष्टाचरणे दुष्कृतं दुष्कृतिः ।

नि+पराभवे सक० निकरोति (पराभवति) नीकरः

निस्+निर+शुद्धौ अक० निष्करोति निष्कृतिः ( शुद्धिः )

निर् आ+निवारणे सक० निराकरोति "निराकरिष्णू वर्द्धिष्णू वर्त्तिष्णू परितोरणम्" भट्टिः ! "निराकरिष्णोर्वृजिना-द्दतेऽपि" रघुः

परा+निराकरणे सक० । पराकरोति [ परिष्करोति

परि+परिष्कारे सतोगुणान्तराधाने भूषणे च सक० सुट् च

प्र+प्रस्तावे सक० प्रकरोति प्रकृत्य । आरम्भे च "प्रकृत जपविधीनामाश्रयमुद्भिन्नदन्तम्" माघः ।

प्रति+प्रतिकारे अनिष्टनिवारणे प्रतिकूलाचरणे च सक० प्रति-करोति प्रतीकारः प्रतिक्रिया ।

वि+विभागे विकरोति "स त्रेधात्मानं व्यकुरुत" छा० उ० । "व्यकुरुत व्यभजद्" भा० । विकारे (अन्यथास्थितस्य वस्तु-नोऽन्यथाभावे) अक०आ० वायर्विकुरुते" सि० कौ० ।